CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P. 13
Coll. No. 425

Title Gangā lahari

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 425 Subject: Kavya

Title: Gangā lahari

Author: Jagannātha Scribe: Jeśankara Jamnārāṃ

Date of the work: – Date of the Ms.: V.S. १८०४

Place of the work: – Place of the Ms.: Vārāṇaśi

Size: 6.9." by 3.9" Extent: 14 foll

Language: Sanskrit Script: Devanāgarī

Remarks: ____

गं.ल.॥
॥१॥

लहरि

॥श्रीगणेशायनमः॥श्रीगजाननायनमः॥श्रीगंगाभा
गीरथ्यैनमः॥श्रीविश्वेश्वरायनमः॥श्रीरामः समृद्धं
सौभाग्यंसकलवसुधायाःकिमपितन्महैश्वर्यंलीला
जनितजगतःखंडपरशोः॥श्रुतीनांसर्वस्वंसुकृतम
थमूर्तंसुमनसांसुधासौंदर्यंतेसलिलमशिवंनःश
मयतु॥१॥दरिद्राणांदैन्यंदुरितमथदुर्वासनहृदां ॥१॥
द्रुतंदूरीकुर्वन्सकृदुपगतोदृष्टिसरणिम्॥अपिद्रा

गाविद्याद्रुमदलनदीक्षागुरुरिहंप्रवाहस्तेवारांश्रिय
मयमपारांदिशतुनः॥२॥उदंचन्मार्तंडस्फुटकपटहेरं
बजननीकटाक्षव्याक्षेपक्षणजनितसंक्षोभनिवहाः॥
भवंतुत्वंगंतोहरशिरसिगंगातनुभवस्तरंगाःप्रोत्तुं
गादुरितभयभंगायभवताम्॥३॥स्मृतीयातापुंसाम
कृतसुकृतानामपिचयाहरत्यंतस्तंद्रांतिमिरमिवचं
द्रांशुसरणिः॥इयंसातेमूर्तिःसकलसुरसंसेव्यसलि

सा ममांतः संतापं त्रिविधमपि पापं च हरतां ॥४॥ त
वालंबादंब स्फुरदलघुगर्वेण सहसा मया सर्वेवज्ञा
सरणिमथ नीताः सुरगणाः ॥ इदानीमौदास्यं यदि भज
सि भागीरथि तदा निराधारो हा रोदिमि कथय केषामि
ह पुरः ॥५॥ अपि प्राज्यं राज्यं तृणमिव परित्यज्य सह
सा विलोलद्वानीरं तव जननि तीरं श्रितवतां ॥ सुधा ॥२॥
तःस्वादीयं सलिलमिदमातृप्ति पिबतां जनानामानं

दः परिहसति निर्वाणपदवीम् ॥६॥ प्रभाते स्नातीनां नृ
पतिरमणीनां कुचतटीगतो यावन्मातर्मिलति तव तो
यैर्मृगमदः ॥ मृगास्तावद्वैमानिकशतसहस्रैः परिवृ
ता विशंति स्वच्छंदं विमलवपुषो नंदनवनं ॥७॥ स्मृतं स
द्यः स्वांतं विरचयति शांतं सकृदपि प्रगीतं यत्पापं झ
टिति भवतापं च हरति ॥ इदं तद्गंगेति श्रवणरमणीयं
खलु पदं मम प्राणप्रांते वदनकमलांतर्विलसतु ॥८॥

यदंतःखेलंतःखलुबहलसंतोषभरितानकाकानाका
धीश्वरनगरसाकांक्षमनसः॥निवासाल्लोकानांज
निमरणशोकापहरणंतदेततेतीरंश्रमशमनधीरं
भवतुनः॥९॥नयत्साक्षाद्वेदैरपिगलितभेदैरवसि
तंनयस्मिंजीवानांप्रसरतिमनोवागवसरः॥निरा
कारंनित्यंनिजमहिमनिर्वासिततमोविशुद्धंयत्तत्त्वंसु ॥३॥
रतटिनितत्त्वंनविषयः॥१०॥महादानैर्ध्यानैर्बहुविध

वितानैरपिचयन्नलभ्यंघोराभिःसुविमलतपोरा
जिभिरपि॥अचिंत्यंतद्विष्णोःपदमखिलसाधारणत
याददानाकेनासित्वमिहतुलनीयाकथयनः॥११॥नृणा
मीक्षामात्रादपिपरिहरंत्याभवभयंशिवायास्तेमूर्तेःक
इहमहिमानंनिगदतु॥अमर्षम्लानायाःपरममनुरोध
गिरिभुवोविहायश्रीकंठःशिरसिनियतंधारयतिया
म्॥१२॥विनिंद्यान्युन्मत्तैरपिचपरिहार्याणिपतितैर

वाच्यान्निर्व्रात्यैःसपुलकमपास्यान्निपिशुनैः॥हरंत्वंलो
कानामनवरतमेनांसिकियतां कदाप्यश्रांतात्वंजग
तिपुनरेकाविजयसे॥१३॥स्खलंतीस्वर्लोकादवनित
लशोकापहृतयेजटाजूटग्रंथौयदसिविनिबद्धापुर
भिदा॥अयेनिर्लोभानामपिमनसिलोभंजनयतांगुणा
नामेवायंतवजननिदोषःपरिणतः॥१४॥जडानंधान्पं ॥४॥
गून्प्रकृतिबधिरानुक्तिविकलान्ग्रहग्रस्तानस्ताखि

लदुरितनिस्तारसरणीन्॥निलिंपैर्निर्मुक्तानपिचनिर
यांतर्निपततोनरानंबत्रातुंत्वमिहपरमंभेषजमसि॥
१५॥स्वभावस्वच्छानांसहजशिशिराणामयमपामपार
स्तेमातर्जगतिमहिमाकोपिजयति॥मुदायंगायंतिद्यु
तलमनवद्यद्युतिभृतःसमासाद्याद्यापिस्फुरदपुलक
सांद्राःसगरजाः॥१६॥कृतक्षुद्रैनस्कानथझटितिसंत
प्तमनसःसमुद्धर्तुंसंतित्रिभुवनतलेतीर्थनिवहाः॥अ

पिप्रायश्श्वित्रप्रसरणपथातीतचरितान्नरान्दूरीकर्तुं
त्वमिवजननित्वंविजयसे॥१७॥निधानंधर्माणांकिम
पिचविधानंनवमुदांप्रधानंतीर्थानाममलपरिधानंत्रि
जगतः॥समाधानंबुद्धेरथखलुतिरोधानमधियांश्रि
यामाधानंनःपरिहरतुतापंतववपुः॥१८॥पुरोधावंधा
वंद्रविणमदिराघूर्णितधियांमहीपानांनानांतरतरु
णखेदस्यनियतं॥ममैवायंमातुःस्वहितशतहंतुर्जड

धियोवियोगस्तेमातर्यदिहकरुणातःक्षणमपि॥१९॥
मरुल्लीलालोलल्लहरिलुलिताम्भोजपटलस्खलत्पांसुव्रा
तछुरणविसरत्कौंकुमरुचि॥सुरस्त्रीवक्षोजक्षरदग
रुजंबालजटिलंजलंतेजंबालंममजननजालंजरय
तु॥२०॥समुत्पत्तिःपद्मारमणपदपद्मामलनखान्नि
वासःकंदर्पप्रतिभटजटाजूटभवने॥अथायंव्यासं
गोहतपतितनिस्तारणविधौनकस्मादुत्कर्षस्तवजन

विधत्तांनिःशंकंनिरवधिसमाधिंविधिरहोसुखंशेषेशेतांहरिरि
विरतंनृत्यतुहरः॥सतप्रायश्चित्तैरलमथतपोदानयजनैःसवित्रीकामा नोयदिजगतिजागर्तिभवती ॥२३॥
निजागर्तिजगति॥२१॥नगेभ्योयांतीनांकथयतटिनीनां
कतमयापुराणंसंहर्तुंसुरधुनिकपर्दोधिरुरुहे॥क
याचश्रीभर्तुःपदकमलमक्षालिसलिलैस्तुलालेशोय
स्यांतवजननीदीयेतकविभिः॥२२॥अनाथःस्नेहार्द्रांवि
गलितगतिःपुण्यगतिदांपतन्विश्वोद्धर्त्रींगदविद
लितःसिद्धभिषजं॥सुधासिंधुतृष्णाकुलितहृदयोमा
तरमयंशिशुःसंप्राप्तस्त्वामहमिहविदध्याःसमुचितं

॥२४॥विलीनोवैवैवस्वतनगरकोलाहलभरोगतादु
तादूरंक्वचिदपिपरेतान्मृगयितुं॥विमानानांव्रातो
विदलयतिवीथीर्दिविषदांकथातेकल्याणीयदवधि
महीमंडलमगात्॥२५॥स्फुरत्कामक्रोधप्रबलतर
ससंजातजटिलज्वरज्वालाजालज्वलितवपुषांनः
प्रतिदिनं॥हरंतांसंतापंकमपिमरुदुल्लासलहरि
छटाचंचत्पाथःकणसरणयोदिव्यसरितः॥२६॥इ

इंहिब्रह्मांडंसकलभुवनाभोगभवनंतरंगैर्यस्यांतर्लु
ठतिपरितस्तिंदुकमिव।।सएषश्रीकंठप्रविततजटाजू
टजटिलोजलानांसंघातस्तवजननितापंहरतुनः।
।।२७।।त्रपंतेतीर्थानीत्वरितमिहयस्योद्धृतिविधौकरं
कर्णेकुर्वंत्यपिकिलकपालिप्रभृतयः।।इमंत्वंमा
मंबत्वरितमनुकंपार्द्रहृदयेपुनानासर्वेषामघमथ ।।७।।
नदर्पंदलयसि।।२८।।श्वपाकानांव्रातैरमितविचिकि

त्साविचलितैर्विमुक्तानामेकंकिलसदनमेनःपरिषदा
म्।।अहोमामुद्धर्तुंजननिघटयंत्याःपरिकरंतवश्ला
घांकर्तुंकथमिवसमर्थोनरपशुः।।२९।।नकोप्येता
वंतंखलुसमयमारभ्यमिलितोयदुद्धारादाराद्भव
तिजगतोविस्मयभरः।।इतिमामीहांतेमनसिचि
रकालंस्थितवतीमयंसंप्राप्तोहंसफलयितुमेवप्र
णतयः।।३०।।श्ववृत्तिव्यासंगोनियतमथमिथ्याप्र

जयन्नं कुतर्केष्वभ्यासः सततपरपैशुन्यमननं ॥ अपी
श्रावंश्रावं मम तु पुनरेवंविधगुणानिते त्वत्को नाम
क्षणमपि निरीक्षेत वदनम् ॥३१॥ विशालाभ्यामाभ्यां
किमिह नयनाभ्यां खलु फलं नयाभ्यामालीढा पर
मरमणीया त्वत्तनु ॥ अयं हि न्यक्कारो जननि मनु
जस्य श्रवणयोर्ययोर्नांतर्यातस्तव लहरिलीलाक
लकलः ॥३२॥ विमानैः स्वच्छंदं सुरपुरमयंते सुकृतिनः

पतंति द्राक् पापा जननि नरकांतः परवशाः ॥ विभा
गोयं तस्मिन्नशुभमयमूर्तौ जनपदे न यत्र त्वं लीला
शमितमनुजाशेषकलुषा ॥३३॥ अपि घ्नंतो विप्रान
विरतमुशंतो गुरुसतीः पिबंतो मैरेयं पुनरपहरंत
श्च कनकं ॥ विहाय त्वय्यंते तनुमतनुदानाध्वरजु
षामुपर्यंब क्रीडंत्यखिलसुरसंभावितपदाः ॥३४॥
अलभ्यं सौरभ्यं हरति सततं यः सुमनसां क्षणादेव

प्राणानपि निरहशस्त्रस्रतन्नतां ॥ त्वदीयानां लीलाचलि
तलहरीणां व्यतिकरात्पुनीते सोपि द्रागहह पवमानस्त्रि
भुवनं ॥२५॥ कियंतः संत्येके नियतमिह लोकार्थघट
काः परे पूतात्मानः कति च परलोकप्रणयिनः ॥ सुखं
शेते मातस्तव खलु कृपातः पुनरयं जगन्नाथ शश्वत्
त्वयि निहितलोकद्वयभरः ॥२६॥ भवत्याहि व्रात्या
धमपतितपाखंडपरिषत्परित्राणस्नेहः श्लथयितु

मशक्यः खलु यथा ॥ ममाप्येवं प्रेमा दुरितनिवहेष्वंब
जगति स्वभावोयं सर्वैरपि खलु यतो दुःपरिहरः ॥२७॥
प्रदोषांतर्नृत्यत्पुरमथनलीलोद्धृतजटा तटाभोगप्रें
खल्लहरी भुजसंतानविधुतिः ॥ विलक्रोडक्रीडज्जल
डमरूडंकारस्फुजगस्तिरोधत्तां तापं त्रिरदशतटिनी
तांडवविधिः ॥२८॥ सदैव त्वय्येवार्पितकुशलचिंता
भरमिमं यदि त्वं मामंब त्यजसि समयेस्मिन्सुविष

मे॥ तदाविश्वासोयंत्रिभुवनतलादस्तमयते निराधा
राचेयंभवतिखलुनिर्व्याजकरुणा॥३९॥ कपर्दादुल्ल
स्यप्रणयमिलदर्धांगयुवतेः पुरारेः प्रेंखंत्यो मृदुलत
रसीमंतसरणौ॥ भवान्यासपत्न्यास्फुरितनयनंको
मलरुचाकरेणाक्षिप्तास्तेजननिविजयंतांलहरयः
॥४०॥ प्रपद्यंतेलोकाः कतिनभवतीमत्रभवतीमुपाधि ॥१०॥
स्तत्रायंस्फुरतियदभीष्टंवितरसि॥ शपेतुभ्यंमात

र्ममतुपुनरात्मासुरधुनिस्वभावादेवत्वय्यमित
मनुरागंविधृतवान्॥४१॥ ललाटेयालोकैरिहखलु
सलीलंतिलकितातमोहंतुंधत्तेतरुणतरमार्तंड
तुलनां॥ विलुंपंतीसद्योविधिलिखितदुर्वर्णसरणिं
त्वदीयासामृत्स्नाममहरतुकृत्स्नामपिशुचं॥४२॥
नरान्मूढांस्तत्तज्जनपदसमासक्तमनसोहसंतःसो
ल्लासंविकचकुसुमव्रातमिषतः॥ पुनानाःसौरभ्यैः

गंगा
॥११॥

लहरि

सततमलिनोनित्यमलिनान्सखयोनः संतुत्रिदश
तटीनीतीरतरवः॥४३॥भजंत्येकेदेवान्कठिनतरसे
वांस्तदपरेवितानव्यासक्तायमरकाः कतियये॥अ
हंतुत्वन्नामस्मरणकृतकामस्त्रिपथगेजगज्जालेजा
नेजननितृणजालेनसदृशम्॥४४॥अविश्रांतंजन्मा
वधिसुकृतकर्मजनकृतांसतांश्रेयःकर्तुंकतिनकृति ॥११॥
नःसंतिविबुधाः॥निरस्तालंबानामकृतसुकृतानांतु

भवतींविनामुष्मिंल्लोकेनपपरवलोकेहितकरं॥४५॥
पयःपीत्वामातस्तवसपदियातःसहचरैर्विमूढैःसं
रंतुंक्वचिदपिनविश्रांतिमगमं॥इदानीमुत्संगेमृदु
पवनसंचारशिशिरेचिरादुन्निद्रंमांसदयहृदये
शाययचिरं॥४६॥वधानद्रागेवद्रढिमरमणीयंप
रिकरंकिरीटेबालेंदुंनियमयपुनःपन्नगगणैः॥न
कुर्यास्त्वंहेलामितरजनसाधारणधियाजगन्नाथस्य

गंगा
॥१२॥

यंस्करध्वनिसमुद्धारसमयः॥४७॥शरच्चंद्रश्वेतांशशिश
कलशोभालमुकुटांकरैःकुंभांभोजेवरभयनिरासौचद
धतीम्॥सुधाधाराकाराभरणवसनांशुभ्रमकरस्थि
तांत्वांयेध्यायंत्युदयतिनतेषांपरिभवः॥४८॥दरस्मि
तसमुल्लसद्वदनकांतिपूरामृतैर्भवज्वलनभर्जिता
ननिशमूर्जयंतीनरान्॥चिदेकमयचंद्रिकाचयच ॥१२॥
मत्कृतितन्वतीतनोतुममशंतनोःसपदिशंतनोरंगना

लहरि

॥४९॥मंत्रैर्मीलितमौषधैर्मुकुलितंत्रस्तंसुराणांगणैः
स्रस्तंसांद्रसुधारसैर्विदलितंगारुत्मतैर्ग्रावभिः॥वी
चिक्षालितकालियाहितपदेस्वर्लोककल्लोलिनित्वंतापं
तिरयाधुनाममभवव्यालावलीढात्मनः॥५०॥द्यूते
नागेंद्रकृत्तिप्रमथगणमणिश्रेणिनंदींदुमुख्यंसर्वस्व
हारयित्वास्वमथपुरभिदिद्राकुपणीकर्तुकामे॥सा
कूतंहैमवत्यामृदुलहसितयावीक्षितायास्तवांब

व्यालोलोल्लासिवल्लल्लहरिनवघटातांडवंनःपुनातु
॥५१॥ विभूषितानंगरिपूत्तमांगासद्यःकृतानेकजना
र्तिभंगा॥ मनोहरोत्तुंगचलत्तरंगागंगाममांगान्यम
लीकरोतु॥५२॥ इमांपीयूषलहरीजगन्नाथेननिर्मि
ता॥ यःपठेत्तस्यसर्वत्रजंयतेनयसंपदः॥५३॥ इति
श्रीमज्जगन्नाथपंडितविरचितागंगालहरीसमाप्ता ॥१३॥
॥ ॥छ॥ ॥श्रीकल्याणमस्तु॥ ॥श्रीशुभंभवतु॥

न्तशमानचपुन्नागाअस्मिन्संसारकानने॥सरलावि
रलायंतेघनायंतेकलिद्रुमाः॥१॥सोहंप्राप्यविवेकती
र्थपदवीमाम्नायतेर्थेपरंमज्जन्सज्जनसंगतीर्थनिपु
णःसद्वृत्ततीर्थंश्रयन्॥लब्ध्वामाकलयन्प्रभावलहरींश्री
भारतीतीर्थतोविद्यातीर्थमुपाश्रयन्हृदिभजेश्रीकंठ
माव्याहतं॥२॥राज्यंयदित्रिभुवनस्यरहासिजन्होः
कन्येतथापितदहंनतृणायमन्ये॥याचेतुकेवलमुमा

गं॰ग्ग
।।१४।।

पतिमौलिसंगेगंगेतवालसचलकरुणकदाहं ।।५४।।
यदिचेदुपेक्षसि त्वं गतिहीनं सर्वतो निराशं ।। वदकरुण
वति गंगे कतमो वपयस्त वास्ति करुणयाः ।।५५।। ।।
श्रीसंवत् १९३५ ना मि॰ ज्येष्ट शुदि १ वार गरेउ एसमा
प्तम् ।। लेखक नागर ज्ञातिय त्र॰ जेशंकर वि॰ जमनारां
मेन लखितं श्रीवाराणशि मध्ये लखी छे आपोथी लखि ।।१४।।
आपी त्र॰ वेणीशंकर वि॰ जटाशंकरजीनी छे ।। श्रीरस्तु ।।